International Journal of Sanskrit Research 2021; 7(2): 88-93

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(2): 88-93
© 2021 IJSR
www.anantaajournal.com
Received: 15-01-2021
Accepted: 27-02-2021

**डॉ. धर्मेश शर्मा**
ऐसिस्टैण्ट, प्रोफैसर, संस्कृतविभागः, नेहरू मैमोरियल शिव नारायण दास स्नातकोत्तर महाविद्यालय, बदायूँ, उत्तर प्रदेश, भारत।

**Corresponding Author:**
**डॉ. धर्मेश शर्मा**
ऐसिस्टैण्ट, प्रोफैसर, संस्कृतविभागः, नेहरू मैमोरियल शिव नारायण दास स्नातकोत्तर महाविद्यालय, बदायूँ, उत्तर प्रदेश, भारत।

# श्रीमद्भगवद्गीतायाः प्रथमाध्यायस्य तिङन्तपदानां व्याकरणात्मकः प्रकृतिप्रत्ययप्रक्रियाविमर्शः

**डॉ. धर्मेश शर्मा**

**सारांशः** श्रीमद्भगवद्गीताया विषये किञ्चिदपि कथनं सूर्याय दीपदर्शनमिव भविष्यति अतस्तस्या विषये कस्याश्चिदपि भूमिकाया उत्थापनं विनैव शोधपत्रशीर्षकस्य कार्यं प्रारभ्यते। अस्मिन् शोधपत्रे श्रीमद्भगवद्गीतायाः प्रथमाध्यायस्य तिङन्तपदानां व्याकरणात्मकः प्रकृतिप्रत्ययप्रक्रियाविमर्शोऽत्र प्रस्तूयते।

**कूटशब्दाः** श्रीमद्भगवद्गीतायाः, प्रथमाध्यायस्य, तिङन्तपदानाम्, व्याकरणात्मकः, प्रकृतिप्रत्ययप्रक्रियाविमर्शः।

## प्रस्तावना

**श्रीमद्भगवद्गीतायाः प्रथमाध्यायस्य तिङन्तपदानां व्याकरणात्मकः प्रकृतिप्रत्ययप्रक्रियाविमर्शः–**

श्रीमद्भगवद्गीताया विषये किञ्चिदपि कथनं सूर्याय दीपदर्शनमिव भविष्यति अतस्तस्या विषये कस्याश्चिदपि भूमिकाया उत्थापनं विनैव शोधपत्रशीर्षकस्य कार्यं प्रारभ्यते। अस्मिन् शोधपत्रे श्रीमद्भगवद्गीतायाः प्रथमाध्यायस्य तिङन्तपदानां व्याकरणात्मकः प्रकृतिप्रत्ययप्रक्रियाविमर्शोऽत्र प्रस्तूयते।
तत्र तावत्–

उवाच– ब्रू इत्ययं धातुरथवा वच् इत्ययं धातुः– ब्रू अथवा वच्, ब्रू इत्यस्मिन् पक्षे 'ब्रुवो वचिः' (अष्टाध्यायीसूत्रपाठः 2/4/53) इत्यनेन सूत्रेण ब्रू इत्यस्य स्थाने वच् इत्ययमादेशः– वच्, 'परोक्षे लिट्' (अष्टाध्यायीसूत्रपाठः 3/2/115) इत्यनेन सूत्रेण वच् इत्यस्मात् परो लिट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् इत्ययं प्रत्ययः– वच् तिप्, 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' (अष्टाध्यायीसूत्रपाठः 3/4/82) इत्यनेन सूत्रेण तिप् इत्यस्य स्थाने णल् (अ) इत्ययमादेशः– वच् अ, 'लिटि धातोरनभ्यासस्य' (अष्टाध्यायीसूत्रपाठः 6/1/8) इत्यनेन सूत्रेण वच् इत्यस्य स्थाने वच् वच् इत्ययं द्विर्वचनादेशः– वच् वच् अ, 'हलादिः शेषः' (अष्टाध्यायीसूत्रपाठः 7/4/60) इत्यनेन सूत्रेण व् च् इत्यनयोः स्थाने व् इत्ययं शेषादेशः– व् अ वच् अ, 'लिट्यभ्यासस्योभयेषाम्' (अष्टाध्यायीसूत्रपाठः 6/1/17) इत्यनेन सूत्रेण व् इत्यस्य स्थाने सम्प्रसारणसंज्ञकः (उ) इत्ययमादेशः– उ अ वच् अ, 'सम्प्रसारणाच्च' (अष्टाध्यायीसूत्रपाठः 6/1/104) इत्यनेन सूत्रेण उ अ इत्यनयोः स्थाने पूर्वरूपः (उ) इत्ययमेकादेशः– उ वच् अ, 'अत उपधायाः' (अष्टाध्यायीसूत्रपाठः 7/2/116) इत्यनेन सूत्रेण अ इत्यस्य स्थाने वृद्धिसंज्ञकः (आ) इत्ययमादेशः– उ व् आ च् अ– उवाच।

अकुर्वत– कृ इत्ययं धातुः– कृ, 'अनद्यतने लङ्' (अष्टाध्यायीसूत्रपाठः 3/2/111) इत्यनेन सूत्रेण कृ इत्यस्मात् परो लङ् लकारः, आत्मनेपदम्, प्रथमपुरुषः, बहुवचनम्, झ इत्ययं प्रत्ययः– कृ झ, 'तनादिकृञ्भ्य उः' (अष्टाध्यायीसूत्रपाठः 3/1/79) इत्यनेन सूत्रेण कृ इत्यस्मात् पर उ इत्ययं प्रत्ययः– कृ उ झ, 'आत्मनेपदेष्वनतः' (अष्टाध्यायीसूत्रपाठः 7/1/5) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अत् इत्ययमादेशः– कृ उ अत् अ, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऋ इत्यस्य स्थाने गुणसंज्ञकः (अर्) इत्ययमादेशः– क् अर् उ अत् अ, 'अत उत्सार्वधातुके' (अष्टाध्यायीसूत्रपाठः 6/4/110) इत्यनेन सूत्रेण अ इत्यस्य स्थान उ इत्ययमादेशः– क् उर् उ अत् अ, 'इको यणचि' (अष्टाध्यायीसूत्रपाठः 6/1/74) इत्यनेन सूत्रेण उ इत्यस्य स्थाने यण् (व्) इत्ययमादेशः– क् उर् व् अत् अ, 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' (अष्टाध्यायीसूत्रपाठः 6/4/71) इत्यनेन सूत्रेण क् उर् व् इत्यस्यादौ अट् (अ) इत्ययमागमः– अ क् उर् व् अत् अ– अकुर्वत।

अब्रवीत्– ब्रू इत्ययं धातुः– ब्रू, 'अनद्यतने लङ्' (अष्टाध्यायीसूत्रपाठः 3/2/111) इत्यनेन सूत्रेण ब्रू इत्यस्मात् परो लङ् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– ब्रू ति, 'इतश्च' (अष्टाध्यायीसूत्रपाठः 3/4/100) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– ब्रू त्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण ब्रू इत्यस्मात् परः शप् इत्ययं प्रत्ययः– ब्रू शप् त्, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्–

ब्र् ई त्, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऊ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– ब्र् ओ ई त्, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ओ इत्यस्य स्थाने अव् इत्ययमादेशः– ब्र् अव् ई त्, 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' (अष्टाध्यायीसूत्रपाठः 6/4/71) इत्यनेन सूत्रेण ब्र् अव् इत्यस्यादौ अट् (अ) इत्ययमागमः– अ ब्र् अव् ई त्– अब्रवीत्।

पश्य– दृश् इत्ययं धातुः– दृश्, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण दृश् इत्यस्मात् परो लोट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– दृश् सि, 'सेर्ह्यपिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/87) इत्यनेन सूत्रेण सि इत्यस्य स्थाने हि इत्ययमादेशः– दृश् हि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण दृश् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– दृश् अ हि, 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' (अष्टाध्यायीसूत्रपाठः 7/3/78) इत्यनेन सूत्रेण दृश् इत्यस्य स्थाने पश्य् इत्ययमादेशः– पश्य् अ हि, 'अतो हेः' (अष्टाध्यायीसूत्रपाठः 6/4/105) इत्यनेन सूत्रेण हि इत्यस्य लुक्संज्ञकमदर्शनम्– पश्य् अ– पश्य।

निबोध– नि इत्युपसर्गपूर्वको बुध् इत्ययं धातुः– नि बुध्, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण बुध् इत्यस्मात् परो लोट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– नि बुध् सि, 'सेर्ह्यपिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/87) इत्यनेन सूत्रेण सि इत्यस्य स्थाने हि इत्ययमादेशः– नि बुध् हि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण बुध् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– नि बुध् अ हि, 'पुगन्तलघूपधस्य च' (अष्टाध्यायीसूत्रपाठः 7/3/86) इत्यनेन सूत्रेण उ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– नि ब् ओ ध् अ हि, 'अतो हेः' (अष्टाध्यायीसूत्रपाठः 6/4/105) इत्यनेन सूत्रेण हि इत्यस्य लुक्संज्ञकमदर्शनम्– नि ब् ओ ध् अ– निबोध।

ब्रवीमि– ब्रू इत्ययं धातुः– ब्रू, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण ब्रू इत्यस्मात् परो लट् लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप् (मि) इत्ययं प्रत्ययः– ब्रू मि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण ब्रू इत्यस्मात् परः शप् इत्ययं प्रत्ययः– ब्रू शप् मि, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– ब्रू मि, 'ब्रुव ईट्' (अष्टाध्यायीसूत्रपाठः 7/3/93) इत्यनेन सूत्रेण मि इत्यस्यादौ ईट् (ई) इत्ययमागमः– ब्रू ई मि, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऊ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– ब्र् ओ ई मि, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ओ इत्यस्य स्थाने अव् इत्ययमादेशः– ब्र् अव् ई मि– ब्रवीमि।

अभिरक्षन्तु– अभि इत्युपसर्गपूर्वको रक्ष् इत्ययं धातुः– अभि रक्ष्, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण रक्ष् इत्यस्मात् परो लोट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– अभि रक्ष् झि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण रक्ष् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– अभि रक्ष् अ झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– अभि रक्ष् अ अन्त् इ, 'एरुः' (अष्टाध्यायीसूत्रपाठः 3/4/86) इत्यनेन सूत्रेण इ इत्यस्य स्थान उ इत्ययमादेशः– अभि रक्ष् अ अन्त् उ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– अभि रक्ष् अ न्त् उ– अभिरक्षन्तु।

दध्मौ– ध्मा इत्ययं धातुः– ध्मा, 'परोक्षे लिट्' (अष्टाध्यायीसूत्रपाठः 3/2/115) इत्यनेन सूत्रेण ध्मा इत्यस्मात् परो लिट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् इत्ययं प्रत्ययः– ध्मा तिप्, 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' (अष्टाध्यायीसूत्रपाठः 3/4/82) इत्यनेन सूत्रेण तिप् इत्यस्य स्थाने णल् (अ) इत्ययमादेशः– ध्मा अ, 'आत औ णलः' (अष्टाध्यायीसूत्रपाठः 7/1/34) इत्यनेन सूत्रेण अ इत्यस्य स्थान औ इत्ययमादेशः– ध्मा औ, 'लिटि धातोरनभ्यासस्य' (अष्टाध्यायीसूत्रपाठः 6/1/8) इत्यनेन सूत्रेण ध्मा इत्यस्य स्थाने ध्मा ध्मा इत्ययं द्विर्वचनादेशः– ध्मा ध्मा औ, 'ह्रस्वः' (अष्टाध्यायीसूत्रपाठः 7/4/59) इत्यनेन सूत्रेण आ इत्यस्य स्थाने ह्रस्वसंज्ञकः (अ) इत्ययमादेशः– ध्म् अ ध्मा औ, 'हलादिः शेषः' (अष्टाध्यायीसूत्रपाठः 7/4/60) इत्यनेन सूत्रेण ध्म् इत्यस्य स्थाने ध् इत्ययं शेषादेशः– ध् अ ध्मा औ, 'अभ्यासे चर्च' (अष्टाध्यायीसूत्रपाठः 8/4/53) इत्यनेन सूत्रेण ध् इत्यस्य स्थाने जश् (द्) इत्ययमादेशः– द् अ ध्मा औ, 'वृद्धिरेचि' (अष्टाध्यायीसूत्रपाठः 6/1/85) इत्यनेन सूत्रेण आ औ इत्यनयोः स्थाने वृद्धिसंज्ञकः (औ) इत्ययमेकादेशः– द् अ ध्म् औ– दध्मौ।

अभ्यहन्यन्त– अभि इत्युपसर्गपूर्वको हन् इत्ययं धातुः– अभि हन्, 'अनद्यतने लङ्' (अष्टाध्यायीसूत्रपाठः 7/2/116) इत्यनेन सूत्रेण हन् इत्यस्मात् परो लङ् लकारः, आत्मनेपदम्, प्रथमपुरुषः, बहुवचनम्, झ इत्ययं प्रत्ययः– अभि हन् झ, 'सार्वधातुके यक्' (अष्टाध्यायीसूत्रपाठः 3/1/67) इत्यनेन सूत्रेण हन् इत्यस्मात् परो यक् (य) इत्ययं प्रत्ययः– अभि हन् य झ, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– अभि हन् य अन्त् अ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– अभि हन् य् अ न्त् अ, 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' (अष्टाध्यायीसूत्रपाठः 6/4/71) इत्यनेन सूत्रेण हन् य् इत्यस्यादौ अट् (अ) इत्ययमागमः– अभि अ हन् य् अ न्त् अ, 'इको यणचि' (अष्टाध्यायीसूत्रपाठः 6/1/74) इत्यनेन सूत्रेण इ इत्यस्य स्थाने यण् (य्) इत्ययमादेशः– अभ् य् अ हन् य् अ न्त् अ– अभ्यहन्यन्त।

प्रदध्मतुः– प्र इत्युपसर्गपूर्वको ध्मा इत्ययं धातुः– प्र ध्मा, 'परोक्षे लिट्' (अष्टाध्यायीसूत्रपाठः 3/2/115) इत्यनेन सूत्रेण ध्मा इत्यस्मात् परो लिट् लकारः, परस्मैपदम्, प्रथमपुरुषः, द्विवचनम्, तस् इत्ययं प्रत्ययः– प्र ध्मा तस्, 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' (अष्टाध्यायीसूत्रपाठः 3/4/82) इत्यनेन सूत्रेण तस् इत्यस्य स्थाने अतुस् इत्ययमादेशः– प्र ध्मा अतुस्, 'आतो लोप इटि च' (अष्टाध्यायीसूत्रपाठः 6/4/64) इत्यनेन सूत्रेण आ इत्यस्य लोपसंज्ञकमदर्शनम्– ध्म् अतुस्, 'लिटि धातोरनभ्यासस्य' (अष्टाध्यायीसूत्रपाठः 6/1/8) इत्यनेन सूत्रेण ध्म् इत्यस्य स्थाने ध्मा ध्म् इत्ययं द्विर्वचनादेशः– प्र ध्मा ध्म् अतुस्, 'ह्रस्वः' (अष्टाध्यायीसूत्रपाठः 7/4/59) इत्यनेन सूत्रेण आ इत्यस्य स्थाने ह्रस्वसंज्ञकः (अ) इत्ययमादेशः– प्र ध्म् अ ध्म् अतुस्, 'हलादिः शेषः' (अष्टाध्यायीसूत्रपाठः 7/4/60) इत्यनेन सूत्रेण ध्म् इत्यस्य स्थाने ध् इत्ययं शेषादेशः– प्र ध् अ ध्म् अतुस्, 'अभ्यासे चर्च' (अष्टाध्यायीसूत्रपाठः 8/4/53) इत्यनेन सूत्रेण ध् इत्यस्य स्थाने जश् (द्) इत्ययमादेशः– प्र द् अ ध्म् अतुस्, रुत्वम्, विसर्गः– प्र द् अ ध्म् अतुः– प्रदध्मतुः।

दध्मुः– ध्मा इत्ययं धातुः– ध्मा, 'परोक्षे लिट्' (अष्टाध्यायीसूत्रपाठः 3/2/115) इत्यनेन सूत्रेण ध्मा इत्यस्मात् परो लिट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– ध्मा झि, 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' (अष्टाध्यायीसूत्रपाठः 3/4/82) इत्यनेन सूत्रेण झि इत्यस्य स्थान उस् इत्ययमादेशः– ध्मा उस्, 'आतो लोप इटि च' (अष्टाध्यायीसूत्रपाठः 6/4/64) इत्यनेन सूत्रेण आ इत्यस्य लोपसंज्ञकमदर्शनम्– ध्म् उस्, 'लिटि धातोरनभ्यासस्य' (अष्टाध्यायीसूत्रपाठः 6/1/8) इत्यनेन सूत्रेण ध्म् इत्यस्य स्थाने ध्मा ध्म् इत्ययं द्विर्वचनादेशः– ध्मा ध्म् उस्, 'ह्रस्वः' (अष्टाध्यायीसूत्रपाठः 7/4/59) इत्यनेन सूत्रेण आ इत्यस्य स्थाने ह्रस्वसंज्ञकः (अ) इत्ययमादेशः– ध्म् अ ध्म् उस्, 'हलादिः शेषः' (अष्टाध्यायीसूत्रपाठः 7/4/60) इत्यनेन सूत्रेण ध्म् इत्यस्य स्थाने ध् इत्ययं शेषादेशः– ध् अ ध्म् उस्, 'अभ्यासे चर्च' (अष्टाध्यायीसूत्रपाठः 8/4/53) इत्यनेन सूत्रेण ध् इत्यस्य स्थाने जश् (द्) इत्ययमादेशः– द् अ ध्म् उस्, रुत्वम्, विसर्गः– द् अ ध्म् उः– दध्मुः।

व्यदारयत्– वि इत्युपसर्गपूर्वको दॄ इत्येष धातुः– वि दॄ, 'हेतुमति च' (अष्टाध्यायीसूत्रपाठः 3/1/26) इत्यनेन सूत्रेण दॄ इत्यस्मात् परो णिच् (इ) इत्ययं प्रत्ययः– वि दॄ इ, 'अचो ञ्णिति' (अष्टाध्यायीसूत्रपाठः 7/2/115) इत्यनेन सूत्रेण ॠ इत्यस्य स्थाने वृद्धिसंज्ञकः (आर्) इत्ययमादेशः– वि द् आर् इ, 'अनद्यतने लङ्' (अष्टाध्यायीसूत्रपाठः 3/2/111) इत्यनेन सूत्रेण द् आर् इ इत्यस्मात् परो लङ् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– वि द् आर् इ ति, 'इतश्च' (अष्टाध्यायीसूत्रपाठः 3/4/100) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– वि द् आर् इ त्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण द् आर् इ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– वि द् आर् इ अ त्, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– वि द् आर् ए अ त्, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ए इत्यस्य स्थाने अय् इत्ययमादेशः– वि द् आर् अय् अ त्, 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' (अष्टाध्यायीसूत्रपाठः 6/4/71) इत्यनेन सूत्रेण द् आर् अय् अ इत्यस्यादौ अट् (अ) इत्ययमागमः– वि अ द् आर् अय् अ त्, 'इको यणचि' (अष्टाध्यायीसूत्रपाठः 6/1/74) इत्यनेन सूत्रेण इ इत्यस्य स्थाने यण् (य्) इत्ययमादेशः– व् य् अ द् आर् अय् अ त्– व्यदारयत्।

आह– ब्रू इत्ययं धातुः– ब्रू, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण ब्रू इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् इत्ययं प्रत्ययः– ब्रू तिप्, 'ब्रुवः पञ्चानामादित आहो ब्रुवः' (अष्टाध्यायीसूत्रपाठः 3/4/84) इत्यनेन सूत्रेण तिप् इत्यस्य स्थाने णल् (अ) इत्ययमादेशो ब्रू इत्यस्य च स्थान आह् इत्ययमादेशश्च– आह् अ, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण आह् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– आह् शप् अ, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– आह् अ– आह।

स्थापय– स्था इत्ययं धातुः– स्था, 'हेतुमति च' (अष्टाध्यायीसूत्रपाठः 3/1/26) इत्यनेन सूत्रेण स्था इत्यस्मात् परो णिच् (इ) इत्ययं प्रत्ययः– स्था इ, 'अर्त्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग्णौ' (अष्टाध्यायीसूत्रपाठः 7/3/36) इत्यनेन सूत्रेण स्था इत्यस्यान्ते पुक् (प्) इत्ययमागमः– स्था प् इ, 'लोट् च' (अष्टाध्यायीसूत्रपाठः 3/3/162) इत्यनेन सूत्रेण स्था प् इ इत्यस्मात् परो लोट् लकारः, परस्मैपदम्, मध्यमपुरुषः, एकवचनम्, सिप् (सि) इत्ययं प्रत्ययः– स्था प् इ सि, 'सेर्ह्यपिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/87) इत्यनेन सूत्रेण सि इत्यस्य स्थाने हि इत्ययमादेशः– स्था प् इ हि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण स्था प् इ इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– स्था प् इ अ हि, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– स्था प् ए अ हि, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ए इत्यस्य स्थाने अय् इत्ययमादेशः– स्था प् अय् अ हि, 'अतो हेः' (अष्टाध्यायीसूत्रपाठः 6/4/105) इत्यनेन सूत्रेण हि इत्यस्य लुक्संज्ञकमदर्शनम्– स्था प् अय् अ– स्थापय।

निरीक्षे– निर् इत्युपसर्गपूर्वक ईक्ष् इत्ययं धातुः– निर् ईक्ष्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण ईक्ष् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, उत्तमपुरुषः, एकवचनम्, इट् (इ) इत्ययं प्रत्ययः– निर् ईक्ष् इ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण इ इत्यस्य स्थान ए इत्ययमादेशः– निर् ईक्ष् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण ईक्ष् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– निर् ईक्ष् अ ए, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ ए इत्यनयोः स्थाने पररूपः (ए) इत्ययमेकादेशः– निर् ईक्ष् ए– निरीक्षे।

अवेक्षे– अव इत्युपसर्गपूर्वक ईक्ष् इत्ययं धातुः– अव ईक्ष्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण ईक्ष् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, उत्तमपुरुषः, एकवचनम्, इट् (इ) इत्ययं प्रत्ययः– अव ईक्ष् इ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण इ इत्यस्य स्थान ए इत्ययमादेशः– अव ईक्ष् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण ईक्ष् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– अव ईक्ष् अ ए, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण पररूपः (ए) इत्ययमेकादेशः– अव ईक्ष् ए, 'आद् गुणः' (अष्टाध्यायीसूत्रपाठः 6/1/84) इत्यनेन सूत्रेण अ ई इत्यनयोः स्थाने गुणसंज्ञकः (ए) इत्ययमेकादेशः– अव् ए क्ष् ए– अवेक्षे।

अपश्यत्– दृश् इत्ययं धातुः– दृश्, 'अनद्यतने लङ्' (अष्टाध्यायीसूत्रपाठः 3/2/111) इत्यनेन सूत्रेण दृश् इत्यस्मात् परो लङ् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– दृश् ति, 'इतश्च' (अष्टाध्यायीसूत्रपाठः 3/4/100) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– दृश् त्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण दृश् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– दृश् अ त्, 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' (अष्टाध्यायीसूत्रपाठः 7/3/78) इत्यनेन सूत्रेण दृश् इत्यस्य स्थाने पश्य् इत्ययमादेशः– पश्य् अ त्, 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' (अष्टाध्यायीसूत्रपाठः 6/4/71) इत्यनेन सूत्रेण पश्य् अ इत्यस्यादौ अट् (अ) इत्ययमागमः– अ पश्य् अ त्– अपश्यत्।

सीदन्ति– षद् इत्ययं धातुः– षद्, 'धात्वादेः षः सः' (अष्टाध्यायीसूत्रपाठः 6/1/62) इत्यनेन सूत्रेण ष् इत्यस्य स्थाने स् इत्ययमादेशः– स् अ द्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण स् अ द् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– स् अ द् झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– स् अ द् अन्त् इ, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण स् अ द् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– स् अ द् अ अन्त् इ, 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' (अष्टाध्यायीसूत्रपाठः 7/3/78) इत्यनेन सूत्रेण स् अ द् इत्यस्य स्थाने सीद् इत्ययमादेशः– सीद् अ अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– सीद् अ न्त् इ– सीदन्ति।

परिशुष्यति– परि इत्युपसर्गपूर्वकः शुष् इत्ययं धातुः– परि शुष्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण शुष् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचन्, तिप् (ति) इत्ययं प्रत्ययः– परि शुष् ति, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण शुष् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– परि शुष् य ति– परिशुष्यति।

जायते– जन् इत्ययं धातुः– जन्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण जन् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– जन् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– जन् त् ए, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण जन् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– जन् य त् ए, 'ज्ञाजनोर्जा' (अष्टाध्यायीसूत्रपाठः 7/3/79) इत्यनेन सूत्रेण जन् इत्यस्य स्थाने जा इत्ययमादेशः– जा य त् ए– जायते।

स्रंसते– स्रंस् इत्ययं धातुः– स्रंस्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण स्रंस् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– स्रंस् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– स्रंस् त् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण स्रंस् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– स्रंस् अ त् ए– स्रंसते।

परिदह्यते– परि इत्युपसर्गपूर्वको दह् इत्ययं धातुः– परि दह्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण दह् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, एकवचनम्, त इत्ययं प्रत्ययः– परि दह् त, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– परि दह् त् ए, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण दह् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– परि दह् य त् ए– परिदह्यते।

शक्नोमि– शक् इत्ययं धातुः– शक्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण शक् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप् (मि) इत्ययं प्रत्ययः– शक् मि, 'स्वादिभ्यः श्नुः' (अष्टाध्यायीसूत्रपाठः 3/1/73) इत्यनेन सूत्रेण शक् इत्यस्मात् परः श्नु (नु) इत्ययं प्रत्ययः– शक् नु मि, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण उ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– शक् न् ओ मि– शक्नोमि।

भ्रमति– भ्रम् इत्ययं धातुः– भ्रम्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण भ्रम् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– भ्रम् ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण भ्रम् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– भ्रम् अ ति– भ्रमति।

पश्यामि– दृश् इत्ययं धातुः– दृश्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण दृश् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप् (मि) इत्ययं प्रत्ययः– दृश् मि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण दृश् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– दृश् अ मि, 'पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' (अष्टाध्यायीसूत्रपाठः 7/3/78) इत्यनेन सूत्रेण दृश् इत्यस्य स्थाने पश्य् इत्ययमादेशः– पश्य् अ मि, 'अतो दीर्घो यञि' (अष्टाध्यायीसूत्रपाठः 7/3/101) इत्यनेन सूत्रेण अ इत्यस्य स्थाने दीर्घसंज्ञकः (आ) इत्ययमादेशः– पश्य् आ मि– पश्यामि।

अनुपश्यामि– अनु इत्युपसर्गपूर्वको दृश् इत्ययं धातुः– अनु दृश्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण दृश् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप् (मि) इत्ययं प्रत्ययः– अनु दृश् मि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण दृश् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– अनु दृश् अ मि, 'पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' (अष्टाध्यायीसूत्रपाठः 7/3/78) इत्यनेन सूत्रेण दृश् इत्यस्य स्थाने पश्य् इत्ययमादेशः– अनु पश्य् अ मि, 'अतो दीर्घो यञि' (अष्टाध्यायीसूत्रपाठः 7/3/101) इत्यनेन सूत्रेण अ इत्यस्य स्थाने दीर्घसंज्ञकः (आ) इत्ययमादेशः– अनु पश्य् आ मि– अनुपश्यामि।

काङ्क्षे– काक्ष् इत्ययं धातुः– काक्ष्, 'इदितो नुम्धातोः' (अष्टाध्यायीसूत्रपाठः 7/1/58) इत्यनेन सूत्रेण आ इत्यस्मात् परो नुम् (न्) इत्ययमागमः– क् आ न् क्ष्, 'नश्चापदान्तस्य झलि' (अष्टाध्यायीसूत्रपाठः 8/3/24) इत्यनेन सूत्रेण न् इत्यस्य स्थाने अनुस्वारः () इत्ययमादेशः– क् आं क्ष्, 'अनुस्वारस्य ययि परसवर्णः' (अष्टाध्यायीसूत्रपाठः 8/4/57) इत्यनेन सूत्रेण अनुस्वारस्य () इत्यस्य स्थाने परसवर्णः (ङ्) इत्ययमादेशः– क् आ ङ् क्ष्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण क् आ ङ् क्ष् इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, उत्तमपुरुषः, एकवचनम्, इट् (इ) इत्ययं प्रत्ययः– क् आ ङ् क्ष् इ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण इ इत्यस्य स्थान ए इत्ययमादेशः– क् आ ङ् क्ष् ए, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण क् आ ङ् क्ष् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– क् आ ङ् क्ष् अ ए, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ ए इत्यनयोः स्थाने पररूपः (ए) इत्ययमेकादेशः– क् आ ङ् क्ष् ए– काङ्क्षे।

इच्छामि– इष् इत्ययं धातुः– इष्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण इष् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, उत्तमपुरुषः, एकवचनम्, मिप् (मि) इत्ययं प्रत्ययः– इष् मि, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण इष् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– इष् अ मि, 'इषुगमियमां छः' (अष्टाध्यायीसूत्रपाठः 7/3/77) इत्यनेन सूत्रेण ष् इत्यस्य स्थाने छ् इत्ययमोदशः– इ छ् अ मि, 'छे च' (अष्टाध्यायीसूत्रपाठः 6/1/71) इत्यनेन सूत्रेण इ इत्यस्यान्ते तुक् (त्) इत्ययमागमः– इ त् छ् अ मि, 'स्तोः श्चुना श्चुः' (अष्टाध्यायीसूत्रपाठः 8/4/39) इत्यनेन सूत्रेण त् इत्यस्य स्थाने च् इत्ययमादेशः– इ च् छ् अ मि, 'अतो दीर्घो यञि' (अष्टाध्यायीसूत्रपाठः 7/3/101) इत्यनेन सूत्रेण अ इत्यस्य स्थाने दीर्घसंज्ञकः (आ) इत्ययमादेशः– इ च् छ् आ मि– इच्छामि।

स्यात्– अस् इत्ययं धातुः– अस्, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण अस् इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– अस् ति, 'इतश्च' (अष्टाध्यायीसूत्रपाठः 3/4/100) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– अस् त्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण त् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– अस् यास् त्, 'सुट् तिथोः' (अष्टाध्यायीसूत्रपाठः 3/4/107) इत्यनेन सूत्रेण त् इत्यस्यादौ सुट् (स्) इत्ययमागमः– अस् यास् स् त्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण अस् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– अस् शप् यास् स् त्, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– अस् यास् स् त्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् स् इत्यनयोर्लोपसंज्ञकमदर्शनम्– अस् या त्, 'श्नसोरल्लोपः' (अष्टाध्यायीसूत्रपाठः 6/4/111) इत्यनेन सूत्रेण अ इत्यस्य लोपसंज्ञकमदर्शनम्– स् या त्– स्यात्।

आश्रयेत्– आङ् (आ) इत्युपसर्गपूर्वकः श्रि इत्ययं धातुः– आ श्रि, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण श्रि इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– आ श्रि ति, 'इतश्च' (अष्टाध्यायीसूत्रपाठः 3/4/100) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– आ श्रि त्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण त् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– आ श्रि यास् त्, 'सुट् तिथोः' (अष्टाध्यायीसूत्रपाठः 3/4/107) इत्यनेन सूत्रेण त् इत्यस्यादौ सुट् (स्) इत्ययमागमः– आ श्रि यास् स् त्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण श्रि इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– आ श्रि अ यास् स् त्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् स् इत्यनयोर्लोपसंज्ञकमदर्शनम्– आ श्रि अ या त्, 'अतो येयः' (अष्टाध्यायीसूत्रपाठः 7/2/80) इत्यनेन सूत्रेण या इत्यस्य स्थान इय् इत्ययमादेशः– आ श्रि अ इय् त्, 'लोपो व्योर्वलि' (अष्टाध्यायीसूत्रपाठः 3/1/64) इत्यनेन सूत्रेण य् इत्यस्य लोपसंज्ञकमदर्शनम्– आ श्रि अ इ त्, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 3/3/84) इत्यनेन सूत्रेण इ इत्यस्य स्थाने गुणसंज्ञकः (ए) इत्ययमादेशः– आ श्र् ए अ इ त्, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ए इत्यस्य स्थाने अय् इत्ययमादेशः– आ श्र् अय् अ इ त्, 'आद् गुणः' (अष्टाध्यायीसूत्रपाठः 6/1/84) इत्यनेन सूत्रेण अ इ इत्यनयोः स्थाने गुणसंज्ञकः (ए) इत्ययमेकादेशः– आ श्र् अय् ए त्– आश्रयेत्।

स्याम– अस् इत्ययं धातुः– अस्, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण अस् इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, उत्तमपुरुषः, बहुवचनम्, मस् इत्ययं प्रत्ययः– अस् मस्, 'नित्यं ङितः' (अष्टाध्यायीसूत्रपाठः 3/4/99) इत्यनेन

सूत्रेण स् इत्यस्य लोपसंज्ञकमदर्शनम्– अस् म, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण म इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– अस् यास् म, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण अस् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– अस् शप् यास् म, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– अस् यास् म, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् इत्यस्य लोपसंज्ञकमदर्शनम्– अस् या म, 'श्नसोरल्लोपः' (अष्टाध्यायीसूत्रपाठः 6/4/111) इत्यनेन सूत्रेण अ इत्यस्य लोपसंज्ञकमदर्शनम्– स् या म– स्याम।

पश्यन्ति– दृश् इत्ययं धातुः– दृश्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण दृश् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– दृश् झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ इत्यस्य स्थाने अन्त् इत्ययमादेशः– दृश् अन्त् इ, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण दृश् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– दृश् अ अन्त् इ, 'पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' (अष्टाध्यायीसूत्रपाठः 7/3/78) इत्यनेन सूत्रेण दृश् इत्यस्य स्थाने पश्य् इत्ययमादेशः– पश्य् अ अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– पश्य् अ न्त् इ– पश्यन्ति।

प्रणश्यन्ति– प्र इत्युपसर्गपूर्वको णश् इत्ययं धातुः– प्र णश्, 'णो नः' (अष्टाध्यायीसूत्रपाठः 6/1/63) इत्यनेन सूत्रेण ण् इत्यस्य स्थाने न् इत्ययमादेशः– प्र न् अ श्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण न् अ श् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– प्र न् अ श् झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ इत्यस्य स्थाने अन्त् इत्ययमादेशः– प्र न् अ श् अन्त् इ, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण न् अ श् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– प्र न् अ श् य अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– प्र न् अ श् य् अ न्त् इ, 'उपसर्गादसमासेऽपि णोपदेशस्य' (अष्टाध्यायीसूत्रपाठः 8/4/14) इत्यनेन सूत्रेण न् इत्यस्य स्थाने ण् इत्ययमोदशः– प्र ण् अ श् य् अ न्त् इ– प्रणश्यन्ति।

अभिभवति– अभि इत्युपसर्गपूर्वको भू इत्ययं धातुः– अभि भू, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण भू इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– अभि भू ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण भू इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– अभि भू अ ति, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऊ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– अभि भ् ओ अ ति, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ओ इत्यस्य स्थाने अव् इत्ययमोदशः– अभि भ् अव् अ ति– अभिभवति।

प्रदुष्यन्ति– प्र इत्युपसर्गपूर्वको दुष् इत्ययं धातुः– प्र दुष्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण दुष् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– प्र दुष् झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण झ इत्यस्य स्थाने अन्त् इत्ययमादेशः– प्र दुष् अन्त् इ, 'दिवादिभ्यः श्यन्' (अष्टाध्यायीसूत्रपाठः 3/1/69) इत्यनेन सूत्रेण दुष् इत्यस्मात् परः श्यन् (य) इत्ययं प्रत्ययः– प्र दुष् य अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– प्र दुष् य् अ न्त् इ– प्रदुष्यन्ति।

पतन्ति– पत् इत्ययं धातुः– पत्, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण पत् इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– पत् झि, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ इत्यस्य स्थाने अन्त् इत्ययमादेशः– पत् अन्त् इ, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण पत् इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– पत् अ अन्त् इ, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– पत् अ न्त् इ– पतन्ति।

उत्साद्यन्ते– उदित्युपसर्गपूर्वकः सद् इत्ययं धातुः– उत् सद्, 'हेतुमति च' (अष्टाध्यायीसूत्रपाठः 3/1/26) इत्यनेन सूत्रेण सद् इत्यस्मात् परो णिच् (इ) इत्ययं प्रत्ययः– उत् सद् इ, 'अत उपधायाः' (अष्टाध्यायीसूत्रपाठः 7/2/116) इत्यनेन सूत्रेण अ इत्यस्य स्थाने वृद्धिसंज्ञकः (आ) इत्ययमादेशः– उत् स् आ द् इ, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण स् आ द् इ इत्यस्मात् परो लट् लकारः, आत्मनेपदम्, प्रथमपुरुषः, बहुवचनम्, झ इत्ययं प्रत्ययः– उत् स् आ द् इ झ, 'सार्वधातुके यक्' (अष्टाध्यायीसूत्रपाठः 3/1/67) इत्यनेन सूत्रेण स् आ द् इ इत्यस्मात् परो यक् (य) इत्ययं प्रत्ययः– उत् स् आ द् इ य झ, 'णेरनिटि' (अष्टाध्यायीसूत्रपाठः 6/4/51) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– उत् स् आ द् य झ, 'झोऽन्तः' (अष्टाध्यायीसूत्रपाठः 7/1/3) इत्यनेन सूत्रेण झ् इत्यस्य स्थाने अन्त् इत्ययमादेशः– उत् स् आ द् य अन्त् अ, 'टित आत्मनेपदानां टेरे' (अष्टाध्यायीसूत्रपाठः 3/4/79) इत्यनेन सूत्रेण अ इत्यस्य स्थान ए इत्ययमादेशः– उत् स् आ द् य अन्त् ए, 'अतो गुणे' (अष्टाध्यायीसूत्रपाठः 6/1/94) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने पररूपः (अ) इत्ययमेकादेशः– उत् स् आ द् य् अ न्त् ए– उत्साद्यन्ते।

भवति– भू इत्ययं धातुः– भू, 'वर्तमाने लट्' (अष्टाध्यायीसूत्रपाठः 3/2/123) इत्यनेन सूत्रेण भू इत्यस्मात् परो लट् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– भू ति, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण भू इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– भू अ ति, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऊ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– भ् ओ अ ति, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ओ इत्यस्य स्थाने अव् इत्ययमादेशः– भ् अव् अ ति– भवति।

अनुशुश्रुम– अनु इत्युपसर्गपूर्वकः श्रु इत्ययं धातुः– अनु श्रु, 'परोक्षे लिट्' (अष्टाध्यायीसूत्रपाठः 3/2/115) इत्यनेन सूत्रेण श्रु इत्यस्मात् परो लिट् लकारः, परस्मैपदम्, उत्तमपुरुषः, बहुवचनम्, मस् इत्ययं प्रत्ययः– अनु श्रु मस्, 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' (अष्टाध्यायीसूत्रपाठः 3/4/82) इत्यनेन सूत्रेण मस् इत्यस्य स्थाने म इत्ययमादेशः– अनु श्रु म, 'लिटि धातोरनभ्यासस्य' (अष्टाध्यायीसूत्रपाठः 6/1/8) इत्यनेन सूत्रेण श्रु इत्यस्य स्थाने श्रु श्रु इत्ययं द्विर्वचनादेशः– अनु श्रु श्रु म, 'हलादिः शेषः' (अष्टाध्यायीसूत्रपाठः 7/4/60) इत्यनेन सूत्रेण श्र् इत्यस्य स्थाने श् इत्ययं शेषादेशः– अनु श् उ श्रु म– अनुशुश्रुम।

हन्युः– हन् इत्ययं धातुः– हन्, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण हन् इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, प्रथमपुरुषः, बहुवचनम्, झि इत्ययं प्रत्ययः– हन् झि, 'झेर्जुस्' (अष्टाध्यायीसूत्रपाठः 3/4/108) इत्यनेन सूत्रेण झि इत्यस्य स्थाने जुस् (उस्) इत्ययमादेशः– हन् उस्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण उस् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– हन् यास् उस्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेने

सूत्रेण स् इत्यस्य लोपसंज्ञकमदर्शनम्– हन् या उस्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण हन् इत्यस्मात् परः शप् इत्ययं प्रत्ययः– हन् शप् या उस्, 'अदिप्रभृतिभ्यः शपः' (अष्टाध्यायीसूत्रपाठः 2/4/72) इत्यनेन सूत्रेण शप् इत्यस्य लुक्संज्ञकमदर्शनम्– हन् या उस्, 'उस्यपदान्तात्' (अष्टाध्यायीसूत्रपाठः 6/1/93) इत्यनेन सूत्रेण आ उ इत्यनयोः स्थाने पररूपः (उ) इत्ययमेकादेशः– हन् य् उ स्, रुत्वम्, विसर्गः– हन् य् उः– हन्युः।

भवेत्– भू इत्ययं धातुः– भू, 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' (अष्टाध्यायीसूत्रपाठः 3/3/161) इत्यनेन सूत्रेण भू इत्यस्मात् परो लिङ् (विधिलिङ्) लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– भू ति, 'इतश्च' (अष्टाध्यायीसूत्रपाठः 3/4/100) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– भू त्, 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (अष्टाध्यायीसूत्रपाठः 3/4/103) इत्यनेन सूत्रेण त् इत्यस्यादौ यासुट् (यास्) इत्ययमागमः– भू यास् त्, 'सुट् तिथोः' (अष्टाध्यायीसूत्रपाठः 3/4/107) इत्यनेन सूत्रेण त् इत्यस्यादौ सुट् (स्) इत्ययमागमः– भू यास् स् त्, 'कर्तरि शप्' (अष्टाध्यायीसूत्रपाठः 3/1/68) इत्यनेन सूत्रेण भू इत्यस्मात् परः शप् (अ) इत्ययं प्रत्ययः– भू अ यास् स् त्, 'लिङः सलोपोऽनन्त्यस्य' (अष्टाध्यायीसूत्रपाठः 7/2/79) इत्यनेन सूत्रेण स् स् इत्यनयोर्लोपसंज्ञकमदर्शनम्– भू अ या त्, 'अतो येयः' (अष्टाध्यायीसूत्रपाठः 7/2/80) इत्यनेन सूत्रेण या इत्यस्य स्थान इय् इत्ययमादेशः– भू अ इय् त्, 'लोपो व्योर्वलि' (अष्टाध्यायीसूत्रपाठः 6/1/64) इत्यनेन सूत्रेण य् इत्यस्य लोपसंज्ञकमदर्शनम्– भू अ इ त्, 'सार्वधातुकार्धधातुकयोः' (अष्टाध्यायीसूत्रपाठः 7/3/84) इत्यनेन सूत्रेण ऊ इत्यस्य स्थाने गुणसंज्ञकः (ओ) इत्ययमादेशः– भ् ओ अ इ त्, 'एचोऽयवायावः' (अष्टाध्यायीसूत्रपाठः 6/1/75) इत्यनेन सूत्रेण ओ इत्यस्य स्थाने अव् इत्ययमादेशः– भ् अव् अ इ त्, 'आद् गुणः' (अष्टाध्यायीसूत्रपाठः 6/1/84) इत्यनेन सूत्रेण अ इ इत्यनयोः स्थाने गुणसंज्ञकः (ए) इत्ययमेकादेशः– भ् अव् ए त्– भवेत्।

उपाविशत्– उप इत्युपसर्गपूर्वको विश् इत्ययं धातुः– उप विश्, 'अनद्यतने लङ्' (अष्टाध्यायीसूत्रपाठः 3/2/111) इत्यनेन सूत्रेण विश् इत्यस्मात् परो लङ् लकारः, परस्मैपदम्, प्रथमपुरुषः, एकवचनम्, तिप् (ति) इत्ययं प्रत्ययः– उप विश् ति, 'इतश्च' (अष्टाध्यायीसूत्रपाठः 3/4/100) इत्यनेन सूत्रेण इ इत्यस्य लोपसंज्ञकमदर्शनम्– उप विश् त्, 'तुदादिभ्यः शः' (अष्टाध्यायीसूत्रपाठः 3/1/77) इत्यनेन सूत्रेण विश् इत्यस्मात् परः श (अ) इत्ययं प्रत्ययः– उप विश् अ त्, 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' (अष्टाध्यायीसूत्रपाठः 6/4/71) इत्यनेन सूत्रेण विश् अ इत्यस्यादौ अट् (अ) इत्ययमागमः– उप अ विश् अ त्, 'अकः सवर्णे दीर्घः' (अष्टाध्यायीसूत्रपाठः 6/1/97) इत्यनेन सूत्रेण अ अ इत्यनयोः स्थाने दीर्घसंज्ञकः (आ) इत्ययमेकादेशः– उप् आ विश् अ त्– उपाविशत्। इति।।

## सन्दर्भा


1. अष्टाध्यायीसूत्रपाठः (पाणिनिमुनिप्रणीतः)– सम्पादकः– पण्डित ब्रह्मदत्त जिज्ञासु, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
2. धातुपाठः (पाणिनिमुनिप्रणीतः)– सम्पादकः– पण्डित ब्रह्मदत्त जिज्ञासु, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
3. अष्टाध्यायीभाष्यम् (प्रथमावृत्तिः), त्रयो भागाः– लेखकौ– पण्डित ब्रह्मदत्त जिज्ञासु, प्रज्ञादेवी व्याकरणाचार्या, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
4. माध्वीया धातुवृत्तिः (सायणविरचिता)– सम्पादकः– विजयपालो विद्यावारिधिः, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
5. पारिभाषिकः– व्याख्याकारः– आचार्य प्रद्युम्न, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
6. वार्तिकप्रकाशः– लेखकः– आनन्दप्रकाश मेधार्थी, प्रकाशकः– चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली।
7. काशिका (वामनजयादित्यविरचिता)– सम्पादकः– विजयपालो विद्यावारिधिः, प्रकाशकः– रामलाल कपूर ट्रस्ट, रेवली, सोनीपत, हरियाणा।
8. व्याकरणमहाभाष्यम् (महर्षिपतञ्जलिमुनिविरचितम्, प्रदीपोद्योतटीकाद्वयसहितम्), षड् भागाः– सम्पादकः– श्री भार्गव शास्त्री, प्रकाशकः– चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली।